# A-II/3/1337/22

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## साहित्यम्

समयः घण्टात्रयम् | पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. रसगङ्गाधरः कस्य रचना ?
2. रसगङ्गाधरकारस्य पितुः नाम किम् ?
3. मङ्गलाचरणे 'तरुणातपम्' इत्यस्य विवक्षितः अर्थः कः ?

**अथवा**

रसगङ्गाधरे कीदृशं काव्यम् उदाहरणत्वेन निहितम् ?

4. मननतरितीर्णविद्यार्णवः कः ?
5. रसगङ्गाधरोक्तं काव्यलक्षणं किम् ?
6. पुनः पुनरनुसन्धानात्मा कः ?

**अथवा**

केन सम्बन्धेन चमत्कारत्ववत्त्वं काव्यत्वम् ?

7. विश्वजनीनव्यवहारतः कस्य काव्यपदार्थत्वम् ?
8. 'एषैव च वेदपुराणादिलक्षणेष्वपि गतिः।' इत्यस्याभिप्रायं स्पष्टयत।
9. काव्यत्वं शब्दार्थयोः प्रत्येकपर्याप्तं चेत् को दोषः ?

**अथवा**

शौर्यादिवद् आत्मधर्माः के ?

10. काव्यस्य कारणं किम् ?
11. प्रतिभायाः हेतुः कः ?
12. व्युत्पत्त्यभ्यासयोः जन्मान्तरीययोः कल्पने को दोषः ?

**अथवा**

पण्डितराजमते काव्यं कतिधा ?

13. उत्तमोत्तमकाव्यलक्षणे 'कमपि' इत्यस्य कोऽर्थो विवक्षितः?

14. उत्तमकाव्यस्य लक्षणं किम्?

15. का नाम व्यक्तिः?

**अथवा**

अभिनवगुप्तमम्मटभट्टादिग्रन्थस्वारस्येन रसः कः?

(5×6=30)

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।**

16. विश्वनाथकृतं काव्यलक्षणं पण्डितराजदिशा आक्षिपत।

17. उत्तमोत्तमकाव्यलक्षणं सोदाहरणं प्रतिपादयत।

**अथवा**

अप्पयदीक्षितोक्तम् अधमपदार्थव्याख्यानं पण्डितराजदिशा दूषयत।

18. अधमकाव्यं सोदाहरणं लक्षयत।

19. ध्वनिसामान्यभेदान् निरूपयत।

**अथवा**

आत्मचैतन्यं रत्यादीन् प्रकाशयतीति युक्त्या व्याख्यात।

20. भट्टनायकसम्मतं रसस्वरूपम् उपन्यस्यत।

**अथवा**

'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।' इति रससूत्रम् अभिनवगुप्तमते व्याख्यात।

(1×20=20)

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।**

21. काव्यकारणमधिकृत्य निबन्धं लिखत।

**अथवा**

काव्यप्रकाशोक्तं काव्यलक्षणं पण्डितराजदिशा खण्डयत।

**अथवा**

रसगङ्गाधरमाश्रित्य पण्डितराजस्य काव्यशास्त्रीयम् अवदानं विमृशत।